| शान्तिगीता (Śāntigītā) : Chapter 1 | |
| --- | --- |
| **अथ प्रथमयोऽध्यायः ।** | **atha prathamo'dhyāyaḥ** |
| युद्धे विनिहते पुत्रे शोकविह्वलमर्जुनम् ।<br>दृष्ट्वा तं बोधयामास भगवान् मधुसूदनः ॥ १॥ | vinihate putre śoka-vihvalam arjunam,<br>dṛṣṭvā tam bodhayāmāsa bhagavān madhusūdanaḥ.1 |
| श्रीभगवानुवाच । | śrībhagavān uvāca |
| किं शोचसि सखे पार्थ विस्मृतोऽसि पुरोदितम् ।<br>मूढप्रायो विमुग्धोऽसि मग्नोऽसि शोकसागरे ॥ २॥ | kiṃ śocasi sakhe pārtha vismṛto 'si puroditam,<br>mūḍha-prāyo vimugdho 'si magno 'si śoka-sāgare. 2 |
| मायिके सत्यवज्ज्ञानं शोकमोहस्य कारणम् ।<br>त्वं बुद्धोऽसि च धीरोऽसि शोकं त्यक्त्वा सुखी भव॥ ३ | māyike satyavat jñānaṃ śoka-mohasya kāraṇam,<br>tvam buddho 'si ca dhīro 'si śokam tyaktvā sukhī bhava. 3 |
| संसारे मायिके घोरे सत्यभावेन मोहितः ।<br>ममताबद्धचित्तोऽसि देहाभिमानयोगतः ॥ ४॥ | saṃsāre māyike ghore satya-bhāvena mohitaḥ,<br>mamatā-baddha-citto 'si dehābhimāna-yogataḥ. 4 |
| को वासि त्वं कथं जातः कः सुतो वा कलत्रकम् ।<br>कथं वा स्नेहबद्धोऽसि क्षणमात्रं विचारय ॥ ५॥ | kaḥ vā asi tvaṃ kathaṃ jātaḥ kaḥ sutaḥ vā kalatrakam,<br>kathaṃ vā sneha-baddho 'si kṣaṇa-mātraṃ vicāraya. 5 |
| अज्ञानप्रभवं सर्वं जीवा मायावशंगताः ।<br>देहाभिमानयोगेन नानादुःखानि भुञ्जते ॥ ६॥ | ajñāna-prabhavaṃ sarvaṃ jīvāḥ māyā-vaśaṃ-gatāḥ<br>dehābhimāna-yogena nānā-duḥkhādi bhuñjate. 6 |
| मनःकल्पितसंसारं सत्यं मत्वा मृषात्मकम् ।<br>दुःखं सुखं च मन्यन्ते प्रातिकूल्यानुकूल्ययोः ॥ ७॥ | manaḥ-kalpita-saṃsāraṃ satyaṃ matvā mṛṣātmakam,<br>duḥkhaṃ sukhaṃ ca manyante prātikūlyānukūlyayoḥ. 7 |
| ममतापाशसंबद्धः संसारे भ्रमप्रत्यये ।<br>अनादिकालतो जीवः सत्यबुद्ध्या विमोहितः ॥ ८॥ | mamatā-pāśa-saṃbaddhaḥ saṃsāre bhrama-pratyaye,<br>anādi-kālataḥ jīvaḥ satya-buddhyā vimohitaḥ. 8 |
| त्यक्त्वा गृहं याति नरं पुराणमालम्बते दिव्यगृहं यथान्यत्।<br>जीवस्तथा जीर्णवपुर्विहाय गृह्णाति देहान्तरमाशु दिव्यम् ॥<br>९॥ | tyaktvā gṛhaṃ yāti navam purāṇam ālambate divya-gṛhaṃ yathā anyat,<br>jīvaḥ tathā jīrṇavapur vihāya gṛhṇāti dehāntaram āśu divyam. 9 |
| अभावः प्रागभावस्य चावस्थापरिवर्तनात् ।<br>परिणामान्विते देहे पूर्वभावो न विद्यते ॥ १०॥ | abhāvaḥ prāk abhāvasya ca avasthā-parivartanāt,<br>pariṇāmānvite dehe pūrva-bhāvaḥ na vidyate. 10 |
| न दृश्यते बाल्यभावो देहस्य यौवनोदये ।<br>अवस्थान्तरसम्प्राप्तौ देहः परिणमेद्यतः ॥ ११॥ | na dṛśyate bālya-bhāvaḥ dehasya yauvanodaye,<br>avasthāntara-samprāptau dehaḥ pariṇamet yataḥ. 11 |
| अतीते बहुले काले दृष्ट्वा न ज्ञायते हि सः ।<br>बुद्धेः प्रत्ययमात्रं तत् स एवेति विनिश्चयः ॥ १२॥ | atīte bahule kāle dṛṣṭvā na jñāyate hi saḥ,<br>buddheḥ pratyaya-mātram tat sa eva iti viniścayaḥ. 12 |
| न पश्यन्ति बाल्यभावं देहस्य यौवनागमे । | |

| | |
|---|---|
| सुतस्य जनकस्तेन न शोचति न रोदिति ।<br>तथा देहान्तरप्राप्तिर्मत्वा शोकं सखे जहि ॥ १३॥ | na paśyanti bālya-bhāvam dehasya yauvanāgame,<br>sutasya janakas tena na śocati na roditi,<br>tathā dehāntara-prāptir matvā śokaṃ sakhe jahi. 13 |
| यत्पश्यसि महाबाहो जगत्तत्प्रातिभासिकम् ।<br>संस्कारवशतो बुद्धेर्दृष्टपूर्वेति प्रत्ययः ॥ १४॥ | yat paśyasi mahābāho jagat tat-prātibhāsikam,<br>saṃskāra-vaśataḥ buddher dṛṣṭa-pūrvaḥ iti pratyayaḥ. 14 |
| दृष्ट्वा तु शुक्तिरजतं लोभाद्ग्रहीतुमुद्यतः ।<br>प्राक् च बोधोदयात् द्रष्टा स्थानान्तरगतस्ततः ॥ १५॥ | dṛṣṭvā tu śukti-rajataṃ lobhāt grahītum udyataḥ,<br>prāk ca bodhodayāt draṣṭā sthānāntara-gatas tataḥ. 15 |
| पुनरागत्य तत्रैव रजतं स प्रपश्यति ।<br>पूर्वदृष्टं मन्यमानो रजतं हर्षमोदितः ।<br>बुद्धेः प्रत्ययसंस्कारात् नास्ति रूप्यं त्रिकालके ॥ १६॥ | punar āgatya tatra eva rajatam saḥ prapaśyati,<br>pūrva-dṛṣṭaṃ manyamāno rajataṃ harṣa-moditaḥ,<br>buddheḥ pratyaya-saṅskarāt nāsti rūpyaṃ tri-kālake. 16 |
| देहो भार्या धनं पुत्रस्तरुराजिनिकेतनम् ।<br>शुक्तिरजतवत् सर्वं न किञ्चित् सत्यमस्ति तत् ॥ १७॥ | dehaḥ bhāryā dhanam putras tarurāji-niketanam,<br>śukti-rajatavat sarvaṃ na kiñcit satyam asti tat. 17 |
| सुषुप्तिकाले न हि दृश्यमानं मनःस्थितं सर्वमनन्तविश्वम्।<br>समुत्थिते तन्मनसि प्रभाति चराचरं विश्वमिदं न सत्यम् ॥ १८॥ | suṣupti-kāle na hi dṛśyamānaṃ manas-sthitaṃ sarvam ananta-viśvam,<br>samutthite tat-manasi prabhāti carācaram viśvam idaṃ na satyam. 18 |
| सदेवासीत्पुरा सृष्टेर्नान्यत् किञ्चिन्मिषत्ततः ।<br>न देशो नापि वा कालो नो भूतं नापि भौतिकम् ॥ १९॥ | sat eva āsīt purā sṛṣṭer na anyat kiñcint miṣat tataḥ,<br>na deśaḥ na api vā kālaḥ no bhūtam na api bhautikam. 19 |
| मायाविजृम्भिते तस्मिन् स्रक्फणीवोत्थितं जगत् ।<br>तत्सत् मायाप्रभावेन विश्वाकारेण भासते ॥ २०॥ | māyā-vijṛmbhite tasmin srak-phaṇī iva utthitam jagat,<br>tat sat māyā-prabhāvena viśvākāreṇa bhāsate. 20 |
| भोक्ता भोगस्तथा भोग्यं कर्ता च करणं क्रिया ।<br>ज्ञाता ज्ञानं तथा ज्ञेयं स्वप्नवद्भाति सर्वशः ॥ २१॥ | bhoktā bhogas tathā bhogyaṃ kartā ca karaṇaṃ kriyā,<br>jñātā jñānam tathā jñeyam svapnavat bhāti sarvaśaḥ. 21 |
| मायानिद्रावशात् स्वप्नः संसारो जीवगः खलु ।<br>कारणं ह्यात्मनोऽज्ञानं संसारस्य धनञ्जय ॥ २२॥ | māyā-nidrā-vaśāt svapnaḥ saṃsāraḥ jīvagaḥ khalu,<br>kāraṇaṃ hi ātmano 'jñānaṃ saṃsārasya dhanañjaya. 22 |
| अज्ञानं गुणभेदेन शक्तिभेदेन न वै पुनः ।<br>मायाऽविद्या भवेदेका चिदाभासेन दीपिता ॥ २३॥ | ajñānaṃ guṇa-bhedena śakti-bhedena na vai punaḥ,<br>māyā 'vidyā bhavet ekā cit-ābhāsena dīpitā. 23 |
| मायाभासेन जीवेशो करोति च पृथग्विधौ ।<br>मायाभासो भवेदीशोऽविद्योपाधिश्च जीवकः ॥ २४॥ | māyā-bhāsena jīveśaḥ karoti ca pṛthak-vidhau,<br>māyābhāsaḥ bhavet īśo 'vidyopādhiś ca jīvakaḥ. 24 |

चिदध्यासाच्चिदाभासो भासितौ चेतनाकृती ।
मायावच्छिन्नचैतन्यश्चाभासाध्यासयोगतः ॥ २५॥
ईशः कर्ता ब्रह्म साक्षी मायोपहितसत्तया ।
अखण्डं सच्चिदानन्दं सर्वधिष्ठानमव्ययम् ॥ २६॥
न जायते म्रियाते वा न दह्यते न शोष्यते ।
अविकारः सदासङ्गो नित्यमुक्तो निरञ्जनः ।
इत्युक्तं ते मया पूर्वं स्मृत्वात्मन्यवधारय ॥ २७॥
शुक्रशोणितयोगेन देहोऽयं भौतिकः स्मृतः ।
बाल्ये बालकरूपोऽसौ यौवने युवकः पुनः ॥ २८॥
गृहीत्वऽन्यस्य कन्यां हि पत्नीभावेन मोहितः ।
पुरा यया न सम्बन्धः सार्द्धाङ्गी सहधर्मिणी ॥ २९॥
तद्गर्भे रेतसा जातः पुत्रश्च स्नेहभाजनः ।
देहमलोद्भवः पुत्रः कीटवन्मलनिर्मितः ।
पितरौ ममतापाशं गले बद्धा विमोहितौ ॥ ३०॥
न देहे तव सम्बन्धो न दारेषु सुते न च ।
पाशबद्धः स्वयं भूत्वा मुग्धोऽसि ममतागुणैः ॥ ३१॥

दुर्जयो ममतापाशश्चाच्छेद्यः सुरमानवैः ।
मम भार्या ममापत्यं मत्वा मुग्धोऽसि मूढवत् ॥ ३२॥
न त्वं देहो महाबाहो तव पुत्रः कथं वद ।
सर्वं त्यक्त्वा विचारेण स्वरूपमवधारय ॥ ३३॥

अर्जुन उवाच ।
किं करोमि जगन्नाथ शोकेन दह्यते मनः ।
पुत्रस्य गुणकर्माणि रूपं च स्मरतो मम ॥ ३४॥
चिन्तापरं मनो नित्यं धैर्यं न लभते क्षणम् ।
उपायं वद मे कृष्ण येन शोकः प्रशाम्यति ॥ ३५॥
श्रीभगवानुवाच ।
मनसि शोकसन्तापौ दह्यमानस्ततो मनः ।
त्वं पश्यसि महाबाहो द्रष्टासि त्वं मनो न हि ॥ ३६॥

cit-adhyāsāt cidābhāso bhāsitau cetanākṛtī,
māyāvat chinna-caitanyam ca ābhāsa-ādhyāsa-yogataḥ. 25
īśaḥ kartā brahma sākṣī māyopahita-sattayā,
akhaṇḍaṃ sat-cidānandaṃ sarvādhiṣṭhānam avyayam. 26

na jāyate mriyāte vā na dahyate na śoṣyate,
avikāraḥ sadāsaṅgaḥ nitya-muktaḥ nirañjanaḥ,
iti uktaṃ te mayā pūrvaṃ smṛtvā ātmani avadhāraya. 27

śukra-śoṇita-yogena deho 'yaṃ bhautikaḥ smṛtaḥ,
bālye bālaka-rūpo 'sau yauvane yuvakaḥ punaḥ. 28

gṛhītva 'nyasya kanyāṃ hi patnī-bhāvena mohitaḥ,
purā yayā na sambandhaḥ sā arddhāṅgī saha-dharmiṇī. 29
tat-garbhe retasā jātaḥ putraś ca sneha-bhājanaḥ,
deha-malodbhavaḥ putraḥ kīṭavat mala-nirmitaḥ,
pitarau mamatā-pāśaṃ gale baddhvā vimohitau. 30
na dehe tava sambandhaḥ na dāreṣu sute na ca,
pāśa-baddhaḥ svayaṃ bhūtvā mugdho 'si mamatā-guṇaiḥ. 31
durjayaḥ mamatā-pāśaś ca acchedyaḥ sura-mānavaiḥ,
mama bhāryā mama apatyaṁ matvā mugdho 'si mūḍhavat. 32
na tvaṁ dehaḥ mahābāho tava putraḥ kathaṃ vada,
sarvaṁ tyaktvā vicāreṇa svarūpam avadhāraya. 33

arjuna uvāca
kiṃ karomi jagat-nātha śokena dahyate manaḥ,
putrasya guṇa-karmāṇi rūpam ca smarataḥ mama. 34

cintā-paraṃ manaḥ nityam dhairyam na labhate kṣaṇam,
upāyam vada me kṛṣṇa yena śokaḥ praśāmyati. 35

śrībhagavān-uvāca

manasi śoka-santāpau dahyamānas tataḥ manaḥ,
tvaṃ paśyasi mahābāho draṣṭā asi tvaṃ manaḥ na hi. 36

| | |
|---|---|
| द्रष्टा दृश्यात् पृथक् न्यायात् त्वं पृथक् च विलक्षणः ।<br>अविवेकात् मनो भूत्वा दग्धोऽहमिति मन्यसे ॥ ३७॥ | draṣṭā dṛśyāt pṛthak nyāyāt tvaṃ pṛthak ca vilakṣaṇaḥ,<br>avivekāt mano bhūtvā dagdho 'ham iti manyase. 37 |
| अन्तःकरणमेकं तच्चतुर्वृत्तिसमन्वितम् ।<br>मनः सङ्कल्परूपं वै बुद्धिश्च निश्चयात्मिका ॥ ३८॥ | antaḥkaraṇam ekaṃ tat-catur-vṛtti-samanvitam,<br>manaḥ saṅkalpa-rūpaṃ vai buddhiś ca niścayātmikā. 38 |
| अनुसन्धानवच्चित्तमहङ्कारोऽभिमानकः ।<br>पञ्चभूतांशसंभूतो विकारी दृश्यचञ्चलः ॥ ३९॥ | anusandhānavat-cittam ahaṅkāro 'bhimānakaḥ,<br>pañca-bhūtāṃśa-saṃbhūto vikārī dṛśya-cañcalaḥ. 39 |
| यदङ्गमग्निना दग्धं जानाति पुरुषो यथा ।<br>तथा मनः शुचा तप्तं त्वं जानासि धनञ्जय ॥ ४०॥ | yat aṅgam agninā dagdham jānāti puruṣaḥ yathā,<br>tathā manaḥ śucā taptaṃ tvaṃ jānāsi dhanañjaya. 40 |
| दग्धहस्तो यथा लोको दग्धोऽहमिति मन्यते ।<br>अविवेकात्तथा शोकतप्तोऽहमिति मन्यते ॥ ४१॥ | dagdha-hastaḥ yathā lokaḥ dagdho 'ham iti manyate,<br>avivekāt tathā śoka-tapto 'ham iti manyate. 41 |
| जाग्रति जायमानं तत् सुषुप्तौ लीयते पुनः ।<br>त्वं च पश्यसि बोधस्त्वं न मनोऽसि शुगालयः ॥ ४२॥ | jāgrati jāyamānaṃ tat suṣuptau līyate punaḥ,<br>tvam ca paśyasi bodhas tvaṃ na mano 'si śugālayaḥ. 42 |
| सुषुप्तौ मानसे लीने न शोकोऽप्यणुमात्रकः ।<br>जाग्रति शोकदुःखादि भवेन्मनसि चोत्थिते ॥ ४३॥ | suṣuptau mānase līne na śoko 'pi aṇu-mātrakaḥ,<br>jāgrati śoka-duḥkhādi bhavet manasi ca utthite. 43 |
| सर्वं पश्यसि साक्षी त्वं तव शोकः कथं वद ।<br>शोको मनोमये कोषे दुःखोद्वेगभयादिकम् ॥ ४४॥ | sarvaṃ paśyasi sākṣī tvam tava śokaḥ kathaṃ vada.<br>śoko manomaye koṣe duḥkhodvega-bhayādikam. 44 |
| स्वरूपोऽनबोधेन तादात्म्याध्यासयोगतः ।<br>अविवेकान्मनोधर्मं मत्वा चात्मनि शोचसि ॥ ४५॥ | svarūpo 'nabodhena tādātmyādhyāsa-yogataḥ,<br>avivekātmano-dharmam matvā ca ātmani śocasi. 45 |
| शोकं तरति चात्मज्ञः श्रुतिवाक्यं विनिश्चिनु ।<br>अतः प्रयत्नतो विद्वान्नात्मानं विद्धि फाल्गुन ॥ ४६॥ | śokaṃ tarati ca ātmajñaḥ śruti-vākyaṃ, viniścinu<br>ataḥ prayatnataḥ vidvān na ātmānaṃ viddhi phālguna. 46 |
| इत्यध्यात्मविद्यायां योगशास्त्रे शान्तिगीतायां<br>श्रीवासुदेवार्जुनसंवादे प्रथमयोऽध्यायः॥ | iti adhyātma-vidyāyāṃ yoga-śāstre śāntigītāyāṃ<br>śrīvāsudeva-arjuna-saṃvāde prathamayo 'dhyāyaḥ. |